|| শ্ৰী লক্ষ্ম্যষ্টকম ||

য়স্যাঃ কটাক্ষমাত্ৰেণ ব্ৰহ্মৰুদ্ৰেংদ্ৰপূৰ্ৱকাঃ |
সুৰাঃ স্ৱীয়পদান্যাপুঃ সা লক্ষ্মীৰ্মে প্ৰসীদতু || ১ ||

য়াঽনাদিকালতো মুক্তা সৰ্ৱদোষৱিৱৰ্জিতা |
অনাদ্যনুগ্ৰহাদ্ৱিষ্ণোঃ সা লক্ষ্মীৰ্মে প্ৰসীদতু || ২ ||

দেশতঃ কালতশ্চৈৱ সমৱ্যাপ্তা চ তেন য়া |
তথাঽপ্যনুগুণা ৱিষ্ণোঃ সা লক্ষ্মীৰ্মে প্ৰসীদতু || ৩ ||

ব্ৰহ্মাদিভ্যোঽধিকং পাত্ৰং কেশৱানুগ্ৰহস্য য়া |
জননী সৰ্ৱলোকানাং সা লক্ষ্মীৰ্মে প্ৰসীদতু || ৪ ||

ৱিশ্ৱোৎপত্তিস্থিতিলয়া য়স্যা মংদকটাক্ষতঃ |
ভৱংতি ৱল্লভা ৱিষ্ণোঃ সা লক্ষ্মীৰ্মে প্ৰসীদতু || ৫ ||

য়দুপাসনয়া নিত্যং ভক্তিজ্ঞানাদিকান গুণান |
সমাপ্নুৱংতি মুনয়ঃ সা লক্ষ্মীৰ্মে প্ৰসীদতু || ৬ ||

অনালোচ্যাপি য়জ্জ্ঞানমীশাদন্যত্ৰ সৰ্ৱদা |
সমস্তৱস্তুৱিষয়ং সা লক্ষ্মীৰ্মে প্ৰসীদতু || ৭ ||

অভীষ্টদানে ভক্তানাং কল্পৱৃক্ষায়িতা তু য়া |

সা লক্ষ্মীৰ্মে দদাৎিৱষ্টং ঋজুসংঘসমৰ্চিতা ‖ ৮ ‖

এতল্লক্ষ্ম্যষ্টকং পুণ্যং য়ঃ পঠেদ্ভক্তিমান নৰঃ |
ভক্তিজ্ঞানাদি লভতে সৰ্ৱান কামানৱাপ্নুয়াত ‖ ৯ ‖

ৱৈষ্ণৱেভ্যঃ প্ৰদাতৱ্যমেতত স্তোত্ৰং প্ৰয়ত্নতঃ |
অৱৈষ্ণৱায় য়ো দদ্যাত মোহাত স ব্ৰহ্মহা ভৱেত ‖ ১০ ‖

‖ ইতি শ্ৰীশ্ৰীমুষ্ণাচাৰ্য়কৃতং শ্ৰীলক্ষ্ম্যষ্টকম ‖

www.yousigma.com